# Vibhishanagita from Adhyatmaramayana

# વિભીષણગીતા અધ્યાત્મરામાયણે

## Document Information

Text title : vibhiShaNagItA adhyAtmarAmayaNe

File name : vibhIShaNagItAadhyAtmarAmayaNa.itx

Category : gItA, giitaa

Location : doc_giitaa

Transliterated by : PSA Easwaran

Proofread by : PSA Easwaran

Description-comments : Vibhishanagita - from Adhyatmaramayana Yuddha Kanda - 3rd Sarga - Slokas 13 to 37

Latest update : May 30, 2013

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskscript**.

March 3, 2025

*sanskritdocuments.org*

# વિભીષણગીતા અધ્યાત્મરામાયણે

રામસ્ય વચનં શ્રુત્વા સુગ્રીવો હૃષ્ટમાનસઃ ।
વિભીષણમથાનાય્ય દર્શયામાસ રાઘવમ્ ॥ ૧૩॥

વિભીષણસ્તુ સાષ્ટાઙ્ગં પ્રણિપત્ય રઘૂત્તમમ્ ।
હર્ષગદ્ગદયા વાચા ભક્ત્યા ચ પરયાન્વિતઃ ॥ ૧૪॥

રામં શ્યામં વિશાલાક્ષં પ્રસન્નમુખપઙ્કજમ્ ।
ધનુર્બાણધરં શાન્તં લક્ષ્મણેન સમન્વિતમ્ ॥ ૧૫॥

કૃતાઞ્જલિપુટો ભૂત્વા સ્તોતું સમુપચક્રમે ॥ ૧૬ ॥

વિભીષણ ઉવાચ ।
નમસ્તે રામ રાજેન્દ્ર નમઃ સીતામનોરમ ।
નમસ્તે ચણ્ડકોદણ્ડ નમસ્તે ભક્તવત્સલ ॥ ૧૭॥

નમોઽનન્તાય શાન્તાય રામાયામિતતેજસે ।
સુગ્રીવમિત્રાય ચ તે રઘૂણાં પતયે નમઃ ॥ ૧૮॥

જગદુત્પત્તિનાશાનાં કારણાય મહાત્મને ।
ત્રૈલોક્યગુરવેઽનાદિગૃહસ્થાય નમો નમઃ ॥ ૧૯॥

ત્વમાદિર્જગતાં રામ ત્વમેવ સ્થિતિકારણમ્ ।
ત્વમન્તે નિધનસ્થાનં સ્વેચ્છાચારસ્ત્વમેવ હિ ॥ ૨૦॥

ચરાચરાણાં ભૂતાનાં બહિરન્તશ્ચ રાઘવ ।
વ્યાપ્યવ્યાપકરૂપેણ ભવાન્ ભાતિ જગન્મયઃ ॥ ૨૧॥

ત્વન્માયયા હૃતજ્ઞાના નષ્ટાત્માનો વિચેતસઃ ।
ગતાગતં પ્રપદ્યન્તે પાપપુણ્યવશાત્ સદા ॥ ૨૨॥

તાવત્સત્યં જગદ્ભાતિ શુક્તિકારજતં યથા
યાવન્ન જ્ઞાયતે જ્ઞાનં ચેતસાનન્યગામિના ॥ ૨૩॥

ત્વદજ્ઞાનાત્ સદા યુક્તાઃ પુત્રદારગૃહાદિષુ ।
રમન્તે વિષયાન્ સર્વાનન્તે દુઃખપ્રદાન્ વિભો। । ૨૪ ॥

ત્વમિન્દ્રોઽગ્નિર્યમો રક્ષો વરુણશ્ચ તથાનિલઃ ।
કુબેરશ્ચ તથા રુદ્રસ્ત્વમેવ પુરુષોત્તમ ॥ ૨૫॥

ત્વમણોરપ્યણીયાંશ્ચ સ્થૂલાત્ સ્થૂલતરઃ પ્રભો ।
ત્વં પિતા સર્વલોકાનાં માતા ધાતા ત્વમેવ હિ ॥ ૨૬॥

આદિમધ્યાન્તરહિતઃ પરિપૂર્ણોઽચ્યુતોઽવ્યયઃ ।
ત્વં પાણિપાદરહિતશ્ચક્ષુઃશ્રોત્રવિવર્જિતઃ ॥ ૨૭॥

શ્રોતા દ્રષ્ટા ગ્રહીતા ચ જવનસ્ત્વં ખરાન્તક ।
કોશેભ્યો વ્યતિરિક્તસ્ત્વં નિર્ગુણો નિરુપાશ્રયઃ ॥ ૨૮॥

નિર્વિકલ્પો નિર્વિકારો નિરાકારો નિરીશ્વરઃ ।
ષડ્ભાવરહિતોઽનાદિઃ પુરુષઃ પ્રકૃતે પરઃ ॥ ૨૯॥

માયયા ગૃહ્યમાણસ્ત્વં મનુષ્ય ઇવ ભાવ્યસે ।
જ્ઞાત્વા ત્વાં નિર્ગુણમજં વૈષ્ણવા મોક્ષગામિનઃ ॥ ૩૦ ॥

અહં ત્વત્પાદસદ્ભક્તિનિઃશ્રેણીં પ્રાપ્ય રાઘવ ।
ઇચ્છામિ જ્ઞાનયોગાખ્યં સૌધમારોઢુમીશ્વર ॥ ૩૧ ॥

નમઃ સીતાપતે રામ નમઃ કારુણિકોત્તમ ।
રાવણારે નમસ્તુભ્યં ત્રાહિ માં ભવસાગરાત્ ॥ ૩૨॥

તતઃ પ્રસન્નઃ પ્રોવાચ શ્રીરામો ભક્તવત્સલઃ ।
વરં વૃણીષ્વ ભદ્રં તે વાઞ્છિતં વરદોઽસ્મ્યહમ્ ॥ ૩૩ ॥

વિભીષણ ઉવાચ ।
ધન્યોઽસ્મિ કૃતકૃત્યોઽસ્મિ કૃતકાર્યોઽસ્મિ રાઘવ ।
ત્વત્પાદદર્શનાદેવ વિમુક્તોઽસ્મિ ન સંશયઃ ॥ ૩૪॥

નાસ્તિ મત્સદૃશો ધન્યો નાસ્તિ મત્સદૃશઃ શુચિઃ ।
નાસ્તિ મત્સદૃશો લોકે રામ ત્વન્મૂર્તિદર્શનાત્ ॥ ૩૫॥

કર્મબન્ધવિનાશાય ત્વજ્જ્ઞાનં ભક્તિલક્ષણમ્ ।
ત્વદ્ધ્યાનં પરમાર્થં ચ દેહિ મે રઘુનન્દન ॥ ૩૬॥

ન યાચે રામ રાજેન્દ્ર સુખં વિષયસંભવમ્ ।

ત્વત્પાદકમલે સક્તા ભક્તિરેવ સદાસ્તુ મે ॥ ૩૭॥

Vibhishanagita – from Adhyatmaramayana

Yuddha Kanda – 3rd Sarga – Slokas 13 to 37

Encoded and proofread by PSA Easwaran

---

*Vibhishanagita from Adhyatmaramayana*

pdf was typeset on March 3, 2025

Please send corrections to *sanskrit@cheerful.com*